**उष** दाहे बधे च भ्वा॰ पर॰ सक॰ सेट्। ओषति औषीत् ओषाम् बभूव आस चकार उवोष ओषित्वा। ओषितः—उषितः। उष्टा। कर्म्मणि उष्यते ओषामासे ऊषे "ओषामासे मत्सरोत्पातवातास्त्रिग्धहृत्तच्छायारुहाम्" माघः। "हिरण्यमायुरन्नञ्च भूर्गौश्चाप्योषतस्तनुम्" मनुः। "दण्डेनैव तमप्योषेत् स्वकाद्धर्म्माद्धि विच्युतम्" मनुः ओषाञ्चकार कामाग्निर्दशवक्त्रमहर्निशम्" भट्टिः "चिचेत रामस्तत्कृच्छ्रमोषाञ्चक्रे शुचेश्वरः" भट्टिः तस्य "मूत्रप्रतीघातादुष्यते चूष्यते दह्यते पच्यते इव" सुश्रुतः।

**उष** दाहे बधे च भ्वा॰ पर॰ सेट् उदित् सक॰ सेट्। ओषति औषीत् ओषाम् बभूव—आस—चकार उवोष। उदित्त्वात् ओषित्वा उष्ट्वा वेट्। क्त। उष्टः। ओषणः।

अभि—सर्व्वतो दाहे। "योऽभ्युष्टमिश्र इव" शत॰ ब्रा॰ ११,२,७,२३। अभित ओषणं अभ्युष्टं सर्व्वतोदाहः तेनमिश्र इव" भा॰। [ अन्नभेदः अपूपादि॰।

अव—अधःसन्तापनेन दाहे। अवोषः अधोभागे दग्धो

उद्—आधिक्येन दाहे। "मा मोदोषिष्टम् मा मा हिंसिष्टम्" शत॰ब्रा॰ १,५,१,२५। "युवां मासुत्कृष्टमाधिक्येन वा उदोषिष्ट दाहं कार्ष्टम्" भा॰।

उप—सामीप्येन दाहे। "अग्निना वा कक्षमुपोषेत्" आश्व॰ गृ॰ २,४,६। तमग्निभिः समुपोषेत्तद्देनम्" शत॰ ब्रा॰ १२,५,१,१३। उपवासे च उपोषणम्।

प्रति—प्रतिदाहे। "स त्वमग्ने प्रतीकेन प्रत्योषः यातुधान्यः" ऋ॰१०,११८,८। प्रत्येकदाहे च "प्रत्युष्टं रक्षः प्रत्युष्टा अरातयः" यजु॰१,७, "प्रत्युष्टं प्रत्येकं दग्धम्" वेददी॰।

**उषस्** प्रभातीभावे कण्ड्वा॰ पर॰सक॰ सेट्। उषस्यति औषस्यीत् औषसीत् उषस्याम् साम् बभूव आस चकार।

**उष** त्रि॰उष—क। १दाहके २सन्ध्यात्ययसमये ३कामिनि ४गुग्गुलौ।५रात्रिशेषे पु॰मेदि॰। रात्रिशेषस्य मुहूर्त्तात्मककालः पञ्चपञ्चाशद्घटिकोत्तरसूर्य्योदयपर्य्यन्तकालः। ६दिवसे पु॰।

**उषङ्गु** पु॰उष बा॰अङ्गु। रुद्रे तस्य संहर्त्तृत्वात्तथात्वम्। "उषङ्गुश्च विधाता च मान्धाता भूतभावनः" भा॰अनु॰१७

**उषण** न॰उष—क्युन्। १मरिचे २पिप्पलीमूले च ३शुण्ठ्यां, ४चव्यिके(चइ)। पिप्पल्यां च स्त्री। ऊषणशब्दे विवृतिः

**उषती** स्त्री उष—शतृ—बा॰नुम् गुणाभावः रायमुकुटः। अकल्याण्यायां वाचि। "ययाऽस्य वाचा पर उद्विजेत न तां वदेदुषतीं पापलोक्याम्" भा॰स॰६४अ॰८७अ॰। शब्दे पु॰ उषन् शब्दः शाक्ये न॰उषत् वाक्यं तेनास्य त्रिलिङ्गता

**उषत्** पु॰यदुवंश्ये नृपभेदे। क्रोष्टुवंशवर्णने "अनन्तरं सुयज्ञस्तु सुयज्ञतनयोऽभवत्। उषन् यो यज्ञमखिलं स्वधर्म्ममुषतांवरः। शिनेयुरभवत् पुत्र उषतः शत्रुतापनः" हरि॰३७

**उषद्गु** पु॰ यदुवंश्ये नृपभेदे।"स्वाहेः पुत्रोऽभवद्राजा उषद्गुर्वदतांवरः। महाक्रतुभिरीजे योविविधैर्भूरिदक्षिणैः। ततः प्रसूतिमिच्छन् वै उषद्गुःसोऽग्र्यमात्मजम्" हरि॰३७

**उषद्रथ** पु॰ पौरवे नृपभेदे उशीनरस्य भ्रातुस्तितिक्षोःसुतभेदे।"तैतिक्षवोऽभवद्राजा पूर्व्वस्यां दिशि भारत!। उषद्रथो महाराज! फेनस्तस्य सुतोऽभवत्" हरि॰ ३१अ॰।

**उषप** पु॰ उष-दाहे कपन्। १वह्नौ २सूर्य्ये च तयोस्तापकत्वात्तथात्वम्। ३चित्रकवृक्षे च।

**उषर्बुध्** त्रि॰ उषसि बुध्यते बुध—क्विप अहरादि॰ नित्यं रः। अग्निहोत्रकाले प्रबुद्धे। "मर्त्त्येषूषर्भुद्भूदतिथिर्जातवेदाः" ऋ॰६,४,२। "आर्का सूर्य्यस्य रोचनाद्विश्वान् देवानुषर्बुधः" १,१४,६ "आ दाशुषे, जातवेदो वहाद्या देवा उषर्बुधः" ऋ॰ १,४४,१।

**उषर्बुध** त्रि॰ उषसि बुध्यते बुध—क अहरा॰ नित्यं रः। अग्निहोत्रकाले प्रबुद्धे।"इमम् प्र वो अतिथिमुषर्बुधम्" ऋ॰६,१५,१।२अग्नौ पु॰३चित्रकवृक्षे च अमरः।

**उषस्** न॰ ओषत्यन्धकारम् उष—असुन् किच्च। १प्रत्युषे, "उष उषो हि वसो अग्रमेषि" १०,८,४। स च कालः। "पञ्चपञ्च उषःकालः" स्मृतेः पञ्चपञ्चाशद्घटिकोत्तरः। "आसीदासन्ननिर्वाणः प्रदीपार्च्चिरिवोषसि" रघुः।"पुनरुषसि विविक्तैर्मातरिश्वावचूर्ण्य" माघः २सन्ध्यात्यये स्त्री "इह सुरिन्द्राय पूर्व्वीरुषसोदुहाना:" ऋ॰६,२८,१। तेन उषा उषसौ—उषस इत्यादि भकारादौ परे वेदे सस्य दः उषद्भिः सि॰ कौ॰। "निम्रुच उषसस्तक्ववीरिव" ऋ॰ १,१५१,५, ३तदभिमानिदेवताभेदे अस्य देवताद्वन्द्वे पूर्व्वापरयोः उषासादेशः। "नक्तोषासा सुपेशसा" ऋ॰१,१४२,७। तदभिमानिदेवताभेदाभिधायित्वेन देवताद्वन्द्वः।"जिमीषोषासानक्ता सुदुघेव धेनुः" १,१८६४,। आदिपदलोपेऽपि उषासावश्विना" यजु॰ २१,५०। नक्तोषासाविति प्राप्ते आदिपदलोपः वेददी॰। "उषासा वां सुहिरण्ये" यजु॰ २९,६। नक्तोषासावित्यर्थः वेददी॰। "साऽस्य देवता यत्। उषस्य तद्देवताके पश्वादौ" कृष्णाञ्जिरल्लाञ्जिर्महाञ्जिस्त उषस्याः" यजु॰२४,४,उषस्या उषादेवताकास्तदर्थं यूपे नियोज्याः"